
# उपासक दशोपनिषद्



ममं
अन्तेवासी
महासयए
णामं
समणोवासए

पञ्चमगणधर-सर्वलब्धिनिधान-

श्रीसुधर्मस्वामिप्रणीतोपासकदशाङ्गसूत्रस्य

सारसञ्चयरूपा

# उपासकदशोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

**મૂળસૂત્ર** : **ઉપાસક દશા અંગસૂત્ર**
**મૂળ સૂત્રકાર** : પંચમ ગણધર સર્વલબ્ધિનિધાન
શ્રી **સુધર્માસ્વામી** ભગવાન
**નવનિર્મિત**
**સંસ્કૃત સારસંચય** : ઉપાસકદશોપનિષદ્
**સંચયકાર +** : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.દે. શ્રીમદ્વિજય
**સંપાદક** **હેમચન્દ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય
પ.પૂ.આ.દે. શ્રીમદ્વિજય
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા
**સહયોગી** : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-
રાજપ્રેમવિજયજી મ.સા.
**વિષય** : પ્રભુ વીરના દશ શ્રાવકોની કથા
**વિશેષતા** : શ્રાવકાચાર-સત્ત્વ-વૈરાગ્યના અજવાળા
પ્રસરાવતું એક અનુપમ આગમસૂત્ર
**મુદ્રક** : મલ્ટી ગ્રાફિક્સ
www.multygraphics.com

સને 2012 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૮ • વી.સં.૨૫૩૮
પ્રતિ : 500

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

**1) શ્રી અક્ષયભાઈ શાહ**

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

**2) શ્રી ચંદ્રકાંતભાઈ સંઘવી**

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

**3) મલ્ટી ગ્રાફિક્સ**

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## ✿ પ્રકાશકીય ✿

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


## ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

## *॥ નમોઽસ્તુ તસ્મૈ તવ શ્રાવકાય ॥*

શ્રીમંતોને ય શરમાવે
સાધકોને ય મંત્રમુગ્ધ કરે
શ્રમણોને ય
આલંબનભૂત બને

ને સાક્ષાત્
પ્રભુ વીર પણ
પોતાના 'શિષ્ય' તરીકે
જેમનો ઉલ્લેખ કરે

કથા
એ દશ શ્રાવકોની
જે માર્ગદર્શક બનશે
મોક્ષયાત્રાની...

– આ. કલ્યાણબોધિસૂરિ

अथ

# उपासकदशाङ्गोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्य-
मुपासकाङ्गे कथये रहस्यम्।

अत्राऽऽनन्दप्रभृतिदशाध्ययनानि। तत्तदध्ययने नगरादिवर्णनं तु यन्त्रादवसेयम्, अवशेषलेशं तु ब्रूमः।

(१) श्रमणभगवन्महावीरसमवसरणं ज्ञात्वा पादविहारचारेण तत्र गमनम्, प्रभुं प्रदक्षिणीकृत्य वन्दनादि कृत्वा पर्युपासनम्, देशनाश्रवणम्, निर्ग्रन्थप्रवचनश्रद्धानाद्यभिव्यक्तिः, निष्क्रमणासामर्थ्यावेदनम्, पञ्चाणुव्रत-सप्तशिक्षाव्रतयुतद्वादशविधगृहिधर्मप्रतिपत्त्यभिलाषः, 'यथासुखं देवानुप्रिय ! मा प्रतिबन्धं कुरु' इति भगवद्वचसा तत्प्रतिपत्तिः।

तत्र द्विविधत्रिविधेन स्थूलप्राणातिपातादिप्रत्याख्यानम्। तुर्यव्रते स्वभार्यां

मुक्त्वा सर्वमैथुनप्रत्याख्यानम्। पञ्चमे ४ हिरण्यकोट्यो निधाने, ४ वृद्धौ, ४ प्रविस्तरे, एता मुक्त्वा सर्वहिरण्यसुवर्णविधिप्रत्याख्यानम्।

एवं चतुष्पद-हल-शकट-वाहन-जललूषणवस्त्र-दन्तपावन-फल-अभ्यङ्गन-उद्वर्त्तन-मज्जन-वस्त्र-विलेपन-पुष्प-आभूषण-धूपन-पेय-भक्ष्य-ओदन-सूप-घृत-शाक-माधुरक-वटकादि-पानीय-मुखवासगोचरप्रत्याख्यानान्यप्येतेन गृहीतानि।

प्रत्याख्यातश्च चतुर्धाऽनर्थदण्डः - (१) अपध्यानम् (२) प्रमादः (३) हिंस्रप्रदानम् (४) पापकर्मोपदेशश्च।

भगवदुपदेशः- एतेऽतिचाराः श्रावकेण ज्ञातव्याः, नाचरितव्याः। तद्यथा - **सम्यक्त्वे** - शङ्कादयः। **आद्यव्रते** - बन्धादयः। **द्वितीयव्रते** - सहसाभ्याख्यानादयः। **तृतीयव्रते** - स्तेनाहृतादयः। **तुर्यव्रते** - इत्वरिक-परिगृहीतागमनादयः। **पञ्चमव्रते** - क्षेत्रवस्तुप्रमाणातिक्रमादयः। **षष्ठव्रते** - ऊर्ध्वदिक्प्रमाणातिक्रमादयः।

**सप्तमव्रते** - **भोजने** - सचित्ताहारादयः, **कर्मणि** -अङ्गारकर्मादयः। **अष्टमव्रते** - कन्दर्पादयः। **नवमव्रते** - मनोदुष्प्रणिधानादयः। **दशमव्रते** - आनयनप्रयोगादयः। **एकादशमव्रते** - अप्रतिलेखितदुष्प्रतिलेखितशय्यासंस्तारकादयः। **द्वादशमव्रते** - सचित्तनिक्षेपणादयः। **संलेखनायाम्** - इहलोकाशंसाप्रयोगादयः।

द्वादशविधश्रावकधर्मप्रतिपत्त्यनन्तरमानन्दश्रावकोक्तिः - भगवन् ! अद्यप्रभृति न

कल्पते मेऽन्ययूथिकान् तद्देवतास्तत्परि-गृहीतार्हच्चैत्यानि वा वन्दितुं नमस्कर्त्तुं वा, पूर्वमनालप्तेनाऽऽलापादि कर्त्तुम्, तेभ्योऽशनाद्यनुप्रदातुं वा, अन्यत्र राजाद्यभियोगेन। कल्पते मे श्रमणनिर्ग्रन्थान् प्राषुकैषणीयाशनादिना प्रतिलाभयतो विहर्त्तुम्। एवमभिग्रहं गृहीत्वा, प्रश्नानि पृष्ट्वाऽऽर्थान् पर्यादाय स्वगृह आगमनम्, तत्प्रेरितत्पत्न्या अपि भगवदन्तिके श्रावकधर्मप्रतिपत्तिः।

ततः श्रावकपर्यायस्य पञ्चमदशमे

संवत्सरे धर्मजागरिकायामानन्दश्रावक-चिन्ता-राजादीनां स्वकुटुम्बस्य चाऽऽ-धारोऽहम्, अतो नैतेन विक्षेपेणाहं धर्मप्रज्ञप्तिमुपसम्पद्य विहर्त्तुं शक्नोमि। अतः श्रेयो मम ज्येष्ठपुत्रं कुटुम्बे स्थापयित्वा-ऽऽपृच्छ्य मित्रादीन् पौषधशालां प्रतिलेख्य भगवदन्तिकाभ्युपगतधर्मप्रज्ञप्तिमुपसम्पद्य विहर्त्तुम्।

ततोऽसावेवं करोति। आराधयति च द्वादशोपासकप्रतिमाः। ततोऽपि प्रति-पन्नानशनस्यास्यावधिज्ञानोत्पत्तिः।

स्वदर्शनार्थमागताय श्रीगौतमस्वामिने स्वावधिविषयनिवेदनम्, यथा- पूर्वादिदिशि लवणे पञ्चयोजनशतानि, उत्तरे लघुहिमवत्पर्वतं यावत्, ऊर्ध्वं सौधर्मं यावत्, अधश्च रत्नप्रभायां लोलुपाच्युतनरकं यावत्- इति। नैतावन्महदवधिः सम्भवति श्रावकाणामिति गौतमस्वामिविप्रतिपत्तिः, भगवदन्तिके पृच्छा, भगवदुक्तितस्तत्स्थानाऽऽलोचनादि, आनन्दश्रावकाय क्षमापनादानं च।

(२) कामदेवस्यापरेषामपि श्रावकाणां

धर्मप्रतिपत्त्यादिकमानन्दवत्। धनपरिमाणादिविशेषस्तु यन्त्रादवसेयः।

पौषधशालायां पूर्वरात्रापररात्रसमये कामदेवान्तिके मिथ्यादृष्टिदेवप्रादुर्भावः, महाभयङ्करपिशाचरूपविकुर्वणम्, असिं गृहीत्वा 'शीलव्रतादिपरिहारं कुरु, अन्यथा मारयिष्यामि' - इति निर्भत्सनम्। कामदेवस्य निश्चलतां दृष्ट्वाऽसिना तत्खण्डाखण्डिकरणम्, कामदेवेन तद्दुःसह्यवेदनायाः सम्यगधिसहनम्।

ततस्तद्विकुर्वितहस्तिसर्पकृतोपसर्गानपि

सम्यक् सहतेऽसौ। ततः स देवरूपेण प्रकटीभूय "यथार्था शक्रकृतत्वद्दार्ढ्य-प्रशंसा, क्षमयामि च त्वाम्" इत्युक्त्वा गतः। ततो निरुपसर्गमिति कृत्वा पारयति स प्रतिमाम्।

श्रीवीरसमवसरणं ज्ञात्वा कामदेव-श्रावकस्य तत्र गमनम्। देशनानन्तरं भगवता तदुपसर्गव्यतिकरकथनम्, निर्ग्रन्थाद्यनु-शास्तिश्च, यथा यदि तावद् गृहमध्ये वसन्तोऽपि श्रमणोपासका दिव्याद्युपसर्गान् सम्यक् सहन्ति, यावदध्यासते, तदा

द्वादशाङ्गीमधीयानैः श्रमणैस्तु सुतरां ते सम्यक् सोढव्याः - इति। बहुनिर्ग्रन्थादिभिस्तथेति विनयेनैतदर्थप्रतिश्रवणम्।

(३) चुलनीपित्रन्तिके देवप्रादुर्भावः, व्रतादित्यागं न कुरुषे तदा त्वज्ज्येष्ठपुत्रं घातयित्वा, तन्मांसशूल्यानि कृत्वा, तत्तप्तमांसशोणितेनाऽऽसिञ्चामि त्वद्गात्रमितिभापनम्, अभीतं दृष्ट्वा तथाकरणम्, चुलनीपितुः सम्यगध्यासहनम्। एवं मध्यमकनिष्ठपुत्रद्वयघातनाद्यपि। स्वमातुरप्येवंकरणवार्त्तया तत्क्षोभः, पौषधभङ्ग-

पुरस्सरं तद्देवग्रहव्यर्थाऽऽयासः, देवस्याकाश उत्पतनम्, मातृवचसा चुलनीपितुस्तदालोचनादिकरणं च।

(४) सुरादेवस्यापि चुलनीपितृवदुपसर्गः, नवरं प्रान्ते स्वशरीरे षोडशरोगप्रक्षेपवार्त्तया क्षोभः। भार्याकृतप्रतिबोधश्च।

(५) चुल्लशतकस्यापि चुलनीपितृवदुपसर्गः, नवरं प्रान्ते १८ कोटिसुवर्णमुद्राणां शृङ्गाटकादिषु प्रकीर्णतया प्रक्षेपवार्त्तया क्षोभः। पत्न्या प्रतिबोधश्च।

(६) कुण्डकोलिकस्य गोशालकानुयायिदेवकृतदर्शनपरीषहः। तन्निश्चलत्वम्, प्रतितर्केण देवस्य निरुत्तरीकरणं च। श्रीवीरकृता तत्प्रशंसा, श्रमणाद्यनुशास्तिश्च।

(७) शकटालपुत्रो गोशालकानुयायी आजीविकोपासकः। तदन्तिके देवप्रादुर्भावः, कल्येऽत्रागमिष्यति जिनः, तद्वन्दनादि त्वया कर्त्तव्यम्- इत्युक्तवान्। भगवत्समवसरणम्, शकटालपुत्रस्य देशनाश्रवणम्, स्वकीयपञ्चकुम्भकारापणशतेष्वागमनाय भगवदुपनिमन्त्रणम्, भगवत-

स्तत्राऽऽगमनम्, भाण्डनिर्मितिं निदर्शनीकृत्य भगवता नियत्यैकान्तवादस्यापासनम्, शकटालपुत्रप्रतिबोधः, गृहिधर्मप्रतिपत्तिः।

तं पुनराजीविकसमये स्थापयितुं गोशालकाऽऽगमनम्, शकटालपुत्रेण तदनादरः, पीठफलकाद्यर्थं गोशालककृता महाब्राह्मण-महागोप-महासार्थवाह-महाधर्मकथि-महानिर्यामकपदैः श्रीवीरस्य सहेतुका सद्भूतगुणस्तुतिः, तेन सह वादकरणे स्वस्यात्यन्तमसामर्थ्यख्यापनञ्च।

मद्धर्माचार्यसद्भूतगुणकीर्त्तनकरस्त्वमतो निमन्त्रयाम्यत्र विहर्त्तुम्, न तु धर्मबुद्ध्या, इति तदुक्तेर्गोशालकस्य तत्र विहरणम्, बहुप्रज्ञापनादिभिरपि जिनशासनाच्चालने निष्फलत्वम्, ततो निर्गमश्च।

चुलनीपितृवदस्याप्युपसर्गः। प्रान्ते भार्यावधवार्त्तया क्षोभः, भार्याकृत-प्रतिबोधश्च।

(८) महाशतकपत्नीरेवतीकृतः सपत्नीषट्कस्य शस्त्रप्रयोगेन वधः, सपत्नीषट्कस्य च विषप्रयोगेन वधः,

मांसगृद्धिः, स्वपतेः पौषधस्थस्यानुकूलोपसर्गः, महाशतककृतस्तदनादरश्च।

पुनरुपसर्गितस्य महाशतकस्य क्रोधोदयः, अवधिना तन्मरणाद्याभोगः, कथनश्च, यथा- सप्तरात्र्यन्तरेऽलसकव्याधिनाऽसमाधिना मृत्वा रत्नप्रभायां लोलुपाच्युते नरके ८४ वर्षसहस्रस्थितिकेषु नारके त्वमुत्पत्स्यसे - इति। ततो भीतायास्तस्या अपसरणम्, तत्प्रकारेण मरणं नारकतयोत्पादश्च।

भगवत्प्रेषितगौतमस्वामिप्रतिबोधितेन

महाशतकेन स्वकृतानिष्टभाषणस्यालोचनादिकरणञ्च।

(९) (१०) निरुपसर्गमभूदेतच्छ्रावकद्वयम्।

| श्रावकः | नगरम् | पत्नी | गोधनम् | स्वर्णमुद्रा |
|---|---|---|---|---|
| आनन्दः | वणिग्ग्रामः | शिवनन्दा | ४० सहस्राणि | १२ कोटिः |
| कामदेवः | चम्पा | भद्रा | ६० सहस्राणि | १८ कोटिः |
| चुलनीपिता | वाराणसी | श्यामा | ८० सहस्राणि | २४ कोटिः |
| सुरादेवः | वाराणसी | धन्या | ६० सहस्राणि | १८ कोटिः |
| चुल्लशतकः | आलभिया | बहुला | ६० सहस्राणि | १८ कोटिः |
| कुण्डकोलिकः | काम्पिल्यम् | पूजा | ६० सहस्राणि | १८ कोटिः |
| सद्दालपुत्रः | पोलाशम् | अग्निमित्रा | १० सहस्राणि | ३ कोटिः |
| महाशतकः | राजगृहम् | रेवती | ८० सहस्राणि | २४ कोटिः |
| | | (आदि १३) | | कांस्य परिमित |
| नन्दिनीपिता | श्रावस्ती | अश्विनी | ४० सहस्राणि | १२ कोटिः |
| शालिहीपिता | श्रावस्ती | फाल्गुनी | ४० सहस्राणि | १२ कोटिः |

| श्रावकपर्यायः | अवधिः | संलेखना | अनशनम् | उत्पादः |
|---|---|---|---|---|
| २० वर्षाणि | ✓ | १ मासः | १ मासः | सौधर्मे अरुणविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणाभविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणप्रभविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणकान्तविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणश्रेष्ठविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणध्वजविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणभूतविमानम् |
| २० वर्षाणि | ✓ | १ मासः | १ मासः | अरुणावतंसविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणगवविमानम् |
| २० वर्षाणि | × | १ मासः | १ मासः | अरुणकीलविमानम् |

दशापि श्रावका श्रावकपर्याये पञ्चदशमे वत्सरे ज्येष्ठपुत्रं कुटुम्बे स्थापयित्वा पौषधशालां प्रतिपन्नाः। दशानामपि सौधर्मे पल्योपमचतुष्कमायुः। ततश्च्युत्वा दशापि सेत्स्यन्ति महाविदेहे।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखासिततृतीयायां सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનપ્રસૂપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ -૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદ-લિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવ-નિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.


(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્યા સંચય.

## COMING SOON

# મુક્તિનું પરમ રહસ્ય




મૂળકાર


**શ્રી સીમંધરસ્વામી ભગવાન**

શ્લોકવાર્તિકકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

# COMING FOR YOU

## મોક્ષ... આજે.... હમણાં જ.




મૂળકાર

**શ્રી સીમંધરસ્વામી ભગવાન**

શ્લોકવાર્તિકકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

# *Don't Miss it.*




मूलकाराः

प. पू. श्री पूर्वाचार्याः

टीकाकाराः

आ. श्रीकल्याणबोधिसूरयः

## સુકૃત સહયોગી

# શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના